International Journal of Sanskrit Research 2021; 7(6): 145-149

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(6): 145-149
© 2021 IJSR
www.anantaajournal.com
Received: 13-09-2021
Accepted: 15-10-2021

**गीताञ्जलि देइ**
**शोधच्छात्री (न्यायवैशेषिकविभागः)**
**श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः**
**नवदेहली, भारत**

Corresponding Author:
**गीताञ्जलि देइ**
**शोधच्छात्री (न्यायवैशेषिकविभागः)**
**श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः**
**नवदेहली, भारत**

# न्याय-वैशेषिकनये द्रव्यस्वरूपनिरूपणम्

## गीताञ्जलि देइ

**सारांशः**

**द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव। तथा च कारिकावल्याम्-‘क्षित्यप्तेजोमरुद्व्योमकाल दिग्देहिनो मनः। द्रव्याणि......।।’ इति।द्रव्यस्य लक्षणं प्रतिपादयन् सूत्रकारो महर्षिकणादः समुल्लिखति ’क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणम्’।[1]अत्र क्रियावत्त्वं द्रव्यत्त्वम्, गुणवत्त्वं द्रव्यत्त्वम् , समवायिकारणत्वं द्रव्यत्त्वम् इति लक्षणत्रयं बोध्यम्।समवायिकारणतावच्छेदकधर्मवत्त्वं द्रव्यत्वमित्यर्थः। समवायिकारणतावच्छेदकधर्म्मश्च द्रव्यत्वम्। उक्तं च कारिकावल्याम्-’समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम्’ इति। अतः अस्य लक्षणस्य द्रव्यत्ववत्त्वं वा द्रव्यत्वमित्यर्थः पर्य्यवस्यति। अत एव ’द्रव्यत्वजातिमत्त्वं वा द्रव्यत्वम्’ इति द्रव्यस्य लक्षणानन्तरं भवति। प्रशस्तपादादिभिः सर्वे प्राचीनैर्लक्षणमिदम् अमुमतम्। मुक्तावल्यां तर्कदीपिकायां च लक्षणमिदं गृहीतम्।**

**कुटशब्दः न्याय-वैशेषिकनये, द्रव्यस्वरूपनिरूपणम्**

## भूमिका

**वैशेषिकप्रस्थाने द्रव्यादिसप्तपदार्थेष्वाद्या षट्पदार्था भावपदार्थाः भवन्ति, अन्तिमः पदार्थश्चाभावपदार्थः इति परिकल्पिताः सन्ति। तत्र षट्सु भावपदार्थेषु प्रथमः पदार्थो द्रव्यपदवाच्यो भवति। तादृशप्रथमपदार्थस्य द्रव्यस्य लक्षणं प्रतिपादयन् सूत्रकारो महर्षिकणादः समुल्लिखति’ क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षणम्’।[2]**

---

[1] वै. सू. 1.1.15

[2] वै. सू. 1.1.15

द्रव्यलक्षणम्

अत्र क्रियावत्त्वं द्रव्यत्त्वम्, गुणवत्त्वम्, समवायिकारणत्त्वं द्रव्यत्त्वम् इति लक्षणत्रयं बोध्यम्। तत्र क्रियावत्त्वं द्रव्यत्त्वम् इति लक्षणम् आकाश-काल-दिग्-आत्मरूपेषु चतुर्षु विभुद्रव्येषु अव्याप्तम्, तेषां निष्क्रियत्वात्, इति तत् परित्याज्यम्।

गुणवत्त्वं द्रव्यत्त्वम् इति द्रव्यस्य द्वितीयलक्षणम्। गुणवत्त्वं गुणाश्रयत्वम्।अर्थात् गुणाः समवायसम्बन्धेन यत्र वर्तन्ते, गुणानामाश्रयभूतः स पदार्थो द्रव्यमित्यर्थः।

ननु गुणवत्त्वं न द्रव्यसामान्यलक्षणम्, आद्यक्षणावच्छिन्ने द्रव्ये अव्याप्तेः। तथाहि घटः रूपसमवायिकारणम्। कार्यकारणयोश्च न युगपद् उत्पत्तिः, कारणानन्तरं हि कार्यस्य उत्पत्तेः। अतः आद्यक्षणावच्छिन्ने घटे कारणे रूपादिगुणाभावात् तत्र गुण गुणवत्त्वासम्भवात् न तत्र लक्षण समन्वयः। अस्ति च न्यायः आद्यक्षणे निर्गुणं द्रव्यं तिष्ठति इति। उत्पत्तिकालीनं द्रव्यम् न्यायः 'आद्ये क्षणे निर्गुणं तिष्ठति' इति च।

तत्रोच्यते - गुणवत्त्वं गुणाश्रयत्वं गुणात्यन्ताभावानधिकरणत्वं वा इति। आद्यक्षणवच्छित्रे द्रव्ये गुणवत्त्वस्य असत्त्वेऽपि द्वितीयादिक्षणावच्छिन्ने सत्त्वात्, तत्र गुणात्यन्ताभावाधिकरणत्वं नास्तीति लक्षणं सङ्गतमेव इति सत्त्वात्, तत्र गुणात्यन्ताभावाधिकरणगुणाभावशून्यत्वं गुणवत्त्वम्। गुणाभावस्य प्रतियोगी गुणः। यत्र गुणाभावः, तत्र यदि गुणः कदापि न वर्तन्ते तर्हि स गुणाभावः प्रतियोगिव्यधिकरणो भवति। उत्पत्तिकालीनस्य द्रव्यस्य तु गुणाभावाधिकरणत्वेऽपि स गुणाभावो न प्रतियोगिव्यधिकरणो भवति, द्वितीयादिक्षणे गुणसद्भावात् अतो नाव्याप्तिः।

ननु उत्पत्तेः द्वितीयक्षणे द्रव्यस्य नाशे सति तत्र गुणोत्पत्तेरभावात् एतादृशे उत्पन्नविनष्टद्रव्ये गुणात्यन्ताभावानधिकरणत्वरूपस्य प्रतियोगिव्यधिकरण-गुणाभावशून्यत्वरूपस्य वा गुणत्वस्य अभावात् तच्च अव्याप्तिरिति चेत्। न, अत्र गुणसमानाधिकरणसत्ताभिन्नजातिमत्वस्य विवक्षितत्वात्। यस्मिन् अधिकरणे गुणो वर्तते, तस्मिन् या सत्ता भिन्ना जातिः, तस्या जातेः आश्रयोः द्रव्यमित्यर्थः।

गुणाधिकरणे सत्ता द्रव्यत्वं चेति जातिद्वयं वर्तते इति गुणसमानाधिकरण सत्ताभिन्न जातिः द्रव्यत्वजातिः। अतो द्रव्यत्वजातिमत्वं द्रव्यत्वम् इत्यर्थः पर्य्यवस्यति। द्रव्यत्वं च उत्पत्तिकालीने द्रव्ये उत्पन्नविनष्टे द्रव्ये तिष्ठतीति न तत्र तत्र अव्याप्तिः। अत्र न्यायवैशेषिकाणां मते उत्पत्तेः परक्षणे द्रव्यस्य विनाशासम्भवात् उत्पन्नविनष्टमेव नास्तीति तत्र अव्याप्तिशङ्कैव न उत्तिष्ठति। तथा च प्रतियोगिव्यधिकरणगुणाभावशून्यत्वम् गुणात्यन्ताभावानधिकरणत्वं वा गुणत्वम् इत्येनैव सिद्धिरिति केचित्।

समवायिकारणत्वं द्रव्यत्वम् इति तृतीयलक्षणम्। समवायिकारणतावच्छेदकधर्मवत्त्वं द्रव्यत्वमित्यर्थः। समवायिकारणतावच्छेदकधर्म्मश्च द्रव्यत्वम्। उक्तं च कारिकावल्याम्- 'समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम्' इति। अतः अस्य लक्षणस्य द्रव्यत्ववत्त्वं वा द्रव्यत्वमित्यर्थः पर्य्यवस्यति। अत एव 'द्रव्यत्वजातिमत्त्वं वा द्रव्यत्वम्' इति द्रव्यस्य लक्षणानन्तरं भवति। प्रशस्तपादादिभिः सर्वे प्राचीनैर्लक्षणमिदम् अमुमतम्। मुक्तावल्यां तर्कदीपिकायां च लक्षणमिदं गृहीतम्।

द्रव्यत्वजातिसिद्धिप्रकारः

ननु द्रव्यत्वजातौ किं मानम्? न हि तत्र प्रत्यक्षं प्रमाणम्, घृतजतुप्रभृतिषु द्रव्यत्वग्रहात्। अनुगताकृत्या मनुष्यत्वादिजातिः व्यज्यते। न तु द्रव्येषु अनुगताकृतिः काचित् सम्भवति। तस्मात् नव द्रव्येषु जातिव्यञ्जकस्य अभावात् द्रव्यत्वं नैव प्रत्यक्षसिद्धमिति चेत्। न कार्यसमवायिकारणतावच्छेदकतया संयोगस्य विभागस्य वा समवायिकारणतावच्छेदकतया द्रव्यत्वसिद्धेः। अत्र अयं भावः। समवायिकारणत्वं हि द्रव्यत्वम्। द्रव्यनिष्ठा कार्यसमवायिकारणता च किञ्चिद्धर्मावच्छिन्ना कारणतात्वात्, अन्यथा गुणादीनामपि समवायिकारणता स्यात्। स च धर्मो द्रव्यत्वम्। तथा च द्रव्यत्वजातिवच्छिन्नस्य समवायिकारणत्वे ततकारणतायाः अवच्छेदकरूपेण द्रव्यत्वसिद्धिरिति भावः। एवं संयोगः समवायिकारणता किञ्चिद्धर्मावच्छिन्ना, कारणतात्वात्, विभाग - समवायिकाणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वात् इति द्रव्यत्वसिद्धिः। अनुगतरूपेण सिद्धस्य द्रव्यत्वधर्मस्य जातिबाधकाभावात् जातिमत्वमिति भावः।

द्रव्यभेदप्रदर्शनम्

द्रव्याणि

पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव। तथा च कारिकावल्याम्- 'क्षित्यप्तेजोमरुद्व्योमकाला दिग्देहिनो मनः। द्रव्याणि......।।' इति। तत्र गन्धवती पृथिवी। 'क्षितिगन्धहेतुर्नानारूपवती मता।' इति कारिकावल्याम्। गन्धसमवायिकारणं पृथिवी, तस्यां च शुक्लनीलादिभेदेन नानाजातीय रूपं वर्तते इत्यर्थः। सा द्विविधा- नित्या, अनित्या च। नित्या परमाणुरुपा। अनित्या कार्यरूपा। कार्यरूपा पुनः त्रिविधाः- शरीरेन्द्रियविषयभेदात्। शरीरस्मदादीनाम्, तत्र योनिजम्, अयोनिजम् वा। योनिजं द्विविधम्- जरायुजमण्डजं च। जरायुजं मानुषादीनाम्, अण्डजं सर्पादीनाम्। अयोनिजं स्वेजोद्भिज्जादिकम्। स्वेदजं कृमिदंशादीनाम्, उद्भिजं गुल्मादीनाम्। आत्मनो भोगायतनं शरीरम्। इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति। तच्च अतीन्द्रियम् अनुमानज्ञानज्ञेयं च। विषयोः मृत्पाषाणादिः। न च घ्राणेन्द्रियस्य पार्थिवत्यं शङ्कनीयम्, घ्राणेन्द्रियं पार्थिवम्, द्रव्यत्वे सति परकीयरूपादिषु मध्ये गन्धस्यैव अभिव्यञ्जकत्वात्, कुकुमगन्धाभिव्यञ्जकगोघृवत् इत्यनुमानेन तस्थ पार्थिवत्वसिद्धेः। न च पाषाणादो गन्धत्वस्य अनुपलब्धेः तत्र गन्धाभावः शङ्कनीयः, पाषाणभस्मनि गन्धस्य प्रत्यक्षसिद्धत्वात्। अनुपलब्धिस्तु अनुत्कटत्वेनापि उपपद्यते।

शीतस्पर्शवत्यो मधुररसवत्यः आपः। रूपाणां मध्ये शुक्लरूपमेव अपसु वर्तते। तदुक्तम्- 'वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ' इति कारिकावल्याम्। जले शुक्लरूपमेव अस्ति, जलस्य मधुर एव रसः, शीत एव स्पर्श इत्यर्थः। आपो द्विविधाः- नित्याः अनित्याश्च। नित्याः परमाणुरूपाः, अनित्याः कार्यरूपाः। कार्यरूपाः पुनः त्रिविधाः, शरीरेन्द्रियविषयभेदात्। शरीरमयोनिजम् वरुणलोके। इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति। तच्च अतीन्द्रियं अनुमानेनज्ञेयं च। विषयः सरित् समुद्रादिः। रसनं जलीयम्, द्रव्यत्वे सति परकीयगन्धाव्यञ्जकत्वते सति रसव्यञ्जकत्वात्, सक्तुरसाभिव्यञ्जकोदकवत्, इति रसनस्य जलीयत्वसिद्धिः।

उष्णस्पर्शवत् भास्वररूपच्च तेजः। तदुक्त कारिकावल्याम् - 'उष्णस्पर्शस्तेजसस्तु स्यादरूपं शुक्लभास्वरम्' इति। तद्विविधम् - नित्यम्, अनित्यं

च। नित्यं परमाणुरूपम्, अनित्यं कार्यरूपम्। कार्यरूपं पुनः त्रिविधम् - शरीरेन्द्रियविषयभेदात्। शरीरमयोनिजम् आदित्यलोके। इन्द्रियं रूपग्राहकं चक्षुः कृष्णतारावर्ति। तच्च अतीन्द्रियम् अनुमानज्ञेयं च। विषयो वह्निः विद्युत् औदर्यम्, सुवर्णाद्याकरजं च। चक्षुः तेजसम्, द्रव्यत्वे सति परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जतकत्वात् प्रदीपवत्, इति चक्षुषः तैजसत्वसिद्धिः। सुवर्णस्य तेजसत्वम् इति नैयायिकाः। तत्र अनुमानं च सुवर्णं तेजसं, असति प्रतिबन्धके अत्यन्तासंयोगे सत्यपि अनुच्छिद्यमानजन्यद्रव्यत्वात्, यन्नैवं तन्नैवं यथा पृथिवी इति।

रूपरहित स्पर्शवान् वायुः। 'अपाकजोऽनुष्णाशीतःस्पर्शस्तु पवने मतः' इति कारिकावल्याम्। अपाकजो विजातीयतेजःसंयोगाभावेन अनुभूयमानो वा अनुष्णः अशीतश्च स्पर्शः यस्मिन् अस्ति सः वायुः इत्यर्थः। स द्विविधः - नित्यः, अनित्यश्च। नित्यः परमाणुरूपः। अनित्यः कार्यरूपः। कार्यरूपः पुनः त्रिविधः - शरीरेन्द्रियविषयभेदात्। शरीरमयोनिजं वायुलोके। इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति। तच्च अतीन्द्रियम् अनुमानज्ञेयं च। विषयो वृक्षादिकम्पनहेतुर्वायुः प्राणादिश्च। शरीरान्तः सञ्चारी वायुः प्राणः। स च एकोऽपि उपाधिभेदात् प्राणापानापादानव्यानसमानभेदेन पञ्चविधः। त्वक् वायवीयम्, द्रव्यत्वे सति परकीयरूपादिषु मध्ये स्पर्शवत्यैव अभिव्यञ्जकत्वात्, स्वेदशैत्याभिञ्जकव्यजनपवनवत्, इति त्वचो वायवीयत्वसिद्धिः।

शब्दगुणकमाकाशम्। शब्दस्य समवायिकारणम् आकाशम् इत्यर्थः। आकाशस्य तु विज्ञेयः शब्दो वैशेषिकगुणः इति कारिकावल्याम्। तच्च एकं विभुः नित्यं च। अतीतादिव्यवहारहेतुः कालः। इदं भूतम् इदं वर्तमान् इदं भविता इत्यादिशब्दप्रयोगानां कारणं काल इत्यर्थः। 'जन्यानां जनकः कालो जगतामाश्रयो मतः' इति कारिकावल्याम्।

स च एको विभुर्नित्यश्च। प्राच्यादिव्यवहारहेतुर्दिक्। 'दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते' इति कारिकावल्याम्। सा च एका विभ्वी, नित्या च। ज्ञानाधिकरणमात्मा। ज्ञानसमवायिकारणम् आत्मा इत्यर्थः। स चात्मा इन्द्रियाद्यधिष्ठाता। स द्विविधः - परमात्मा, जीवात्मा च। तत्र ईश्वरः सर्वज्ञः परमात्मा एक एव। जीवात्मा प्रतिशरीरं भिन्नो विभुर्नित्यश्च। सुखाद्युपलब्धिसाधनम् आन्तरम् इन्द्रियं मनः। तच्च प्रत्यात्मनियतत्वाद् अनन्तं परमाणुरूपं नित्यं च।

तमोनिरूपणं तत्खण्डनञ्च

अन्धकारः अभावरूपः, नतु भावरूप इति वैशैषिका नैयायिकाश्च मन्यन्ते।

प्राभाकरमीमांसकास्तु नान्धकारः उक्ताभावरूपः, किन्तु तादृशालोकज्ञानाभावरूप इति वदन्ति। वेदान्तिनस्तु तमसो द्रव्यत्त्वमिच्छन्ति। भाट्टमीमांसकानां मतेऽपि तमो द्रव्यमेव।

उपपत्तिश्च - नीलं तमश्चलति इत्यवाधितप्रतीतिबलात् नीलरूपाधारतया क्रियाधारतया च, गुणक्रियावत्वं द्रव्यत्वमिति लक्षणावाप्तेः अस्य द्रव्यत्वं सिद्धम् इति। अनुमानप्रयोगश्च - तमो द्रव्यं क्रियावत्वाद् वायुवत्, तमो द्रव्यं रूपवत्वाद् घटवद् इति। उक्तं च - 'तमस्तमालवर्णाभं चलतीति प्रतीयते। रुपवत्त्वात् क्रियावत्वाद् द्रव्यं तु दशमं तमः।' इति। अपि च "छायायास्तमसश्चापि सम्बन्धाद् गुणकर्मणोः। द्रव्यत्वं केचिदिच्छन्ति मीमांसकमताश्रयाः" इति। तस्य च पृथिव्यादिषु नवद्रव्येषु अनन्तर्भावात् दशमद्रव्यत्वमिति तेषामाशयः। तथाहि

आकाशादिपञ्चके नीरूपे नास्यान्तर्भावः रूपवत्वात्। अतएव न वायौ, स्पर्शाभावात्, सदागतिमत्वाभावाच्च। नापि तेजसि, भास्वररूपाभावात् उष्णस्पर्शाभावाच्च। नापि जले, शीतस्पर्शाभावात् नीलरूपाश्रयत्वाच्च। नापि पृथिव्याम्, गन्धवत्वाभावात् स्पर्शरहितत्वाच्च। तस्मात् क्लृप्तद्रव्येषु अनन्तर्भावात् तमो दशमद्रव्यमिति भाट्टमीमांसकाः।

तत्रोच्यते - सत्यं पृथिव्यादिषु तमसो नान्तर्भावः, न तु तद् द्रव्यान्तरमिति साम्प्रतं वक्तुम्। तमसस्तेजोऽभावरूपत्वात्। तेजः सामान्याभावः तमः इत्यनेनैव सिद्धः तमसो द्रव्यान्तरकल्पनाया अन्याय्यत्वात्। तमसो दशमद्रव्यत्वे तत् नीरूपं रूपवद् वा भवेत्। नतु तमो नीरूपम् इति भाट्टैरपि स्वीकृतम्। न च तमः रूपवद् आलोकासहकृतचक्षुग्राह्यत्वात् आलोकाभाववत्। रूपवतां हि द्रव्यानाम् आलोकसहायेनैव ग्राह्यत्वम्, तमसस्तु आलोकाभावकाले एव ग्राह्यत्वात् तमो न रूपवत्। तेन तमो न द्रव्यम्, तस्मात् प्रौढ़प्रकाशकतेजः सामान्यऽभावस्तमः, तत्र नीलं तमश्चलति इति प्रत्यय भ्रमः। अतः नवद्रव्याणि इति सिद्धम्।

## सन्दर्भग्रन्थसूची


1. किरणावली - उदयनाचार्यः, सम्पा. . विन्ध्येश्वरीप्रसादद्विवेदी, चौखम्बा संस्कृत सीरीज सं. 9, वाराणसी, 1897
2. तत्त्वचिन्तामणिः - गंगेशोपाध्यायः, सं.. ए. ताताचार्यः, केन्द्रीय संस्कृत विद्यापीठ, तिरुपति, 1993
3. तत्त्वसंग्रहः - शान्तरक्षितः, सं.. स्वामी द्वारिकादासशास्त्री, बौद्धभारती, वाराणसी, 1968
4. तर्कामृतम्-जगदीशभट्टाचार्यः, सं.. रामचन्द्रमिश्रः, चौखम्बा विद्याभवन, वाराणसी, 1973
5. तर्ककौमुदी - लौगाक्षिभास्करः, सं..वी. एल. एस. पनसीकरः, निर्णयसागर प्रेस, बम्बई, 1928
6. तर्कभाषा- केशवमिश्रः, सं..बदरीनाथशुक्लः, मोतीलाल बनारसीदास, वाराणसी, 1968
7. तर्कसंग्रहः - अन्नंभट्टः, सं.. अथल्ये. बोडासः, बाम्बे संस्कृत सीरीज, सं. 55, भण्डारकर ओरियण्टल रिसर्च इन्स्टीट्यूट, पूना, 1968
8. तर्कसंग्रहः 'दीपिका' - अन्नंभट्टः, सं.. अथल्ये. बोडासः, बाम्बे संस्कृत सीरीज, सं. 55, भण्डारकर ओरियण्टल रिसर्च इन्स्टीट्यूट, पूना, 1968
9. न्यायकुसुमाञ्जलि - उदयनाचार्यः, सं..महाप्रभुलालगोस्वामी, मिथिला विद्यापीठ ग्रन्थमाला सं. 28, 1972
10. न्यायभाष्यम् - वात्स्यायनः, सं..नारायणमिश्रः, काशी संस्कृत ग्रन्थमाला, 48, वाराणसी, 1970
11. न्यायवार्त्तिकम् - उद्योतकराचार्यः, सं. विन्ध्येश्वरीप्रसाद द्विवेदी, बिब्लोथिका इण्डिका, कलकत्ता, 1887
12. न्यायसिद्धान्तमुक्तावली - विश्वनाथः, सं. श्रीकृष्णवल्लभाचार्यः, काशी संस्कृत ग्रन्थमाला, सं. 212, वाराणसी, 1972
13. प्रशस्तपादभाष्यम् - प्रशस्तपादः, सं. नारायणमिश्रः, काशी संस्कृत (पदार्थधर्मसंग्रहः) ग्रन्थमाला सं. 173, वाराणसी, 1966
14. भारतीय दर्शन - बलदेव उपाध्याय, चौखम्भा सं. सं. दिल्ली, 1977